IJARSCT

International Journal of Advanced Research in Science, Communication and Technology

International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal

ISSN: 2581-9429

Volume 5, Issue 5, December 2025

Impact Factor: 7.67

# श्रीदेवीगीतायां ज्ञानमीमांसा

**प्रो. कुसुम डोबरियाल**

संस्कृत विभागाध्यक्षा, हेमवती नन्दन बहुगुणा, गढवाल, विश्वविद्यालय, पौडी, गढवाल, उत्तराखण्ड

तीजराम वर्मा

शोधच्छात्र, संस्कृत विभाग, हेमवती नन्दन बहुगुणा, गढवाल, विश्वविद्यालय, पौडी, गढवाल, उत्तराखण्ड

kusumdobriyal62@rediffmail.com and atirthramji@gmail.com

**सारांशः** – श्रीमद्देवीभागवतमहापुराणं पुराणवाङ्मयेऽत्यन्तं महिमामये स्थाने विद्यते। शक्त्युपासका इदं पुराणम् शाक्तभागवतमपि कथयन्ति। ग्रन्थेऽस्मिन् सर्वत्र भगवत्या आद्याशक्तेर्महिम्नःप्रतिपादनं क्रियते । अत्र मुख्यत्वेन परब्रह्मणःपरमात्मनो मातृरूपस्य तस्य उपासनायाश्च वर्णनं प्राप्यते। संसारे सर्वेषां प्राणिनां कृते मातृभावस्य महान् महिमा वर्तते। स्वाभाविकरूपेण मानवस्याधिकं श्रद्धा मातृचरणेषु भवति यतो हि लोकस्य सर्वप्रथमं दर्शनं स मातृक्रोडे करोति तस्मान्माता सर्वेषामादिगुरुत्वेन प्रतिष्ठिता । मातुःकृपा लौकिकस्य पारलौकिकस्य च कल्याणस्य आधारस्तस्मादुक्तम् - **"मातृदेवो भव"**[1] । या भगवती महाशक्तिस्वरूपिणी तथा सम्पूर्णजगतो माता सैव सम्पूर्णलोकस्य गुरुस्वरूपा ।

मातुरस्य गुरुस्वरूपस्य दर्शनं 'श्रीदेवीगीतायां' भवति। श्रीदेवीभागवतमहापुराणस्य केचन अध्यायाः 'श्रीदेवीगीता' इति नाम्ना प्रसिद्धम्। अस्यां गीतायां भगवती पर्वतेन्द्राय वेदान्तज्ञानमुपदिशति। अहमेव भगवती वेदान्तशास्त्रेषु ब्रह्मरूपेण कथितं मम स्वाभाविकी शक्तिः माया। माया एव प्रकृतिः,अविद्या, प्रधानमित्यादि नाम्ना व्यवह्रियते। मायाविशिष्टो ब्रह्म अव्यक्तं कथ्यते तस्मादेवाऽऽव्यक्तादाकाशादिक्रमेण सम्पूर्णसृष्टिर्जायते। जगतःकारणं अज्ञानम् । अविद्यया कामना, कामनया कर्म , कर्मणा जन्ममरणचक्रं भवति । अज्ञानस्य ज्ञानेन निवृत्तिर्भवति। निष्कामकर्मणा चितस्य मलपसार्य 'तत्त्वमसि' इत्यादीनां महावाक्यानामर्थबोधं कुर्यात्। उपाधीनां ज्ञानेन निवृत्तौ 'अहं चैतन्यमिति' बोधो भवति ।

**सङ्केत शब्दः** - श्रीमद्देवीभागवतमहापुराणम्, ज्ञानम्, श्रीदेवीगीता, तत्त्वमसि, ब्रह्म, माया, प्रकृतिः, अज्ञानम्, आत्मा।

**प्रस्तावना** –इदं विश्वं शक्त्या एव क्रियाशीलमस्ति ।शक्तिं विना मनुष्या आध्यात्मिकम्, आधिदैविकम्, आधिभौतिकं किमपि कार्यं सम्पादितुं न शक्नुवन्ति । शक्तितत्त्वमेव जगति सर्वान् सुखिनः कुर्वन् मोक्षपदं प्रापयति देवीरूपेण परमतत्त्वस्य उपासना प्राचीनकालात् प्रचलितोऽस्ति । परं ब्रह्म परमात्मा एकैव । ज्ञानिनस्तं एकमेव तत्त्वं शिवं, विष्णुः, काली, दुर्गा, गणपतिरित्यादिभिर्विविधैर्नामभिर्वदन्ति। ऋग्वेदे वर्णितम्– **"एकं सद्विप्रा बहुधा वदन्ति।**[2]**"** शास्त्राणि पुनःपुर्नवदन्ति भिन्नासु देवतासु भेददृष्टिर्न कर्त्तव्या -

**यो ब्रह्मा स हरिःप्रोक्तः, यो हरिः स महेश्वरः।**

**या काली सैव कृष्णः स्यात् यः कृष्णः सैव कालिका॥**

**देवदेवीं समुद्दिश्य न कुर्यादन्तरं क्वचित् ।**

1 तैत्तिरीयोपनिषद् ०१/११/०२

2 ऋग्वेदः ०१/१६४/४६



DOI: 10.48175/IJARSCT-30629

**तत्तत्भेदो न मन्तव्यः शिवशक्तिमयं जगत्॥[3]**

देव्याराधनायाःपरिचायकं विपुलं साहित्यं संस्कृतवाङ्मये वर्तते।बहूनि तन्त्रशास्त्राणि देवीस्वरूपं, रहस्यं, महत्त्वं च प्रकटयन्ति।श्रीमद्देवीभागवतेऽपि देव्या महिमा आख्यानरूपेण प्रस्तुतः।आगमानां मान्यताऽस्ति यदिष्टोपासनायाम् पञ्चाङ्गसाहित्यस्य पाठ आवश्यकं भवति । पञ्चाङ्गसाहित्यमस्ति – कवचं, हृदयं, स्तुतिः, सहस्रनाम, गीता -

**कवचं देवतागात्रं गीता तु देवताशिरः ।**

**हृदयं हृदयं प्रोक्तं मुखं साहस्रकं स्मृतम्।**

**स्तोत्राणि देवतापादौ पञ्चाङ्गं पञ्चभिःस्मृतम्॥[4]**

स्पष्टं पञ्चाङ्गेषु गीता सर्वोच्चमस्ति। गीतां विना उपासनाया दार्शनिकं दृष्टिं न ज्ञातुं शक्यते ।अष्टादशसु पुराणेष्वन्यतमे श्रीमद्देवीभागवते सप्तमस्कन्धे एकत्रिंशत्तमे (३१) अध्याये वर्णितं पराशक्तिर्हिमालयस्य पुत्रीरूपेणावतरणात् पूर्वम् भगवती पर्वतेन्द्राय गूढमध्यात्मोपदेशं दत्तवती, तस्या उपदेशस्य दशस्वध्यायेषु कृतःसंग्रहःश्रीदेवीगीता नाम्ना प्रसिद्धः।एष संग्रह एकत्रिंशत्तमादध्यायाच्चत्वारिंशत्तमपर्यन्तमस्ति।पराशक्तेरवतरणात् प्राक् हिमालयःपराशक्तिम् निवेदयति यथा कृपया भवत्या मम पुत्रीरूपेण जन्मधारणं स्वीकृतं तथैव वेदान्तशास्त्रेषु यद् भवत्याःस्वरूपं वर्णितम् तस्योपदेशं कुरु। हे परमेश्वरि !मह्यं भक्तिपूर्वकं योगं वेदाविरुद्धं ज्ञानं च देहि येनाहं भवत्या अवतरणयोग्यो यथा स्याम

**इदं यथा च दत्तं मे कृपया प्रेमपूर्णया ।**

**सर्ववेदान्तसिद्धं च त्वद्रूपं ब्रूहि मे तथा ॥**

**योगं च भक्तिसहितं ज्ञानं च श्रुतिसंमतम्।**

**वदस्व परमेशानि त्वमेवाहं यतो भवेः॥[5]**

हिमालयस्य वचनं श्रुत्वा परब्रह्मस्वरूपिणी जगन्माता वेदेषु यदुपनिषज्ज्ञानं तमुपदिशति।

**इति तस्य वचःश्रुत्वा प्रसन्नमुखपङ्कजा ।**

**वक्तुमारभताम्बा सा रहस्यं श्रुतिगूहितम्॥[6]**

हे हिमालय ! सृष्टेःपूर्वं यदा किमपि नासीत् तदा अहमासम् । मम निजरूपमेव चित्, संवित् ,परब्रह्म इति नामभिर्ज्ञायन्ते । मम स्वरूपं तर्कैर्न तर्क्यते। तदहं केनापि सङ्केतेन अनिर्दिष्टः। ब्रह्माण्डे मया तुल्यं किमपि न विद्यते । सर्वैर्दोषैर् मुक्तोऽहम्

मम ब्रह्मणःस्वाभाविकशक्तिर्माया अस्ति । मायायाः स्वरूपं न सदस्ति, नासदस्ति, न सदसदस्ति। मायायाःस्वरूपमनिर्वचनीयं, किञ्चिद् विलक्षणमेवास्ति । वेदान्तसारेऽप्युक्तम्-**"अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् ।[7] " ६ वेदान्तसारः**

---

[3] श्रीमद्देवीगीता उपोद्घातः पृष्ठसङ्ख्या ०६

[4] तत्रैव आमुखं पृष्ठसङ्ख्या ०२

[5] श्रीदेवीगीता ०१/७२,७३

[6] पूर्ववत् ०१/७४

[7] ६ वेदान्तसारः

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

मया ब्रह्मणा सह आविष्टा माया जगतो निमित्तकारणं भवति तथा च स्वयं माया जगद्रूपेण परिणतत्वात् समवायिकारणं भवति। तां मायामेव केचन तप इति वदन्ति केचन जडं, केचन ज्ञानं, केचन प्रधानं, केचन प्रकृतिं, केचन शक्तिं, केचन अजाम्। शैवा विमर्श इति वदन्ति। वेदान्तिनोऽविद्या इति प्राहुः-

**अहमेवाऽऽस पूर्वं तु नान्यत्किंचिन्नगाधिप।**

**तदात्मरूपं चित्संवित्परब्रह्मैकनामकम् ॥**

**अप्रतर्क्यमनिर्देश्यमनौपम्यमनामयम्।**

**तस्य काचित्स्वत:सिद्धा शक्तिर्मायेति विश्रुता॥**

**न सती सा नाऽसती सा च नोभयात्मा विरोधत:।**

**एतद्विलक्षणा काचिद्वस्तुभूताऽस्ति सर्वदा॥**[8]

**चैतन्यस्य समायोगान्निमित्तत्वं च कथ्यते।**

**प्रपञ्चपरिणामाच्च समवायित्वमुच्यते॥**

**केचित्तां तप इत्याहुस्तमः केचिज्जडं परे।**

**ज्ञानं मायां प्रधानं च प्रकृतिं शक्तिमप्यजाम्॥**

**विमर्श इति तां प्राहुःशैवशास्त्रविशारदाः।**

**अविद्यामितरे प्राहुर्वेदतत्त्वार्थचिन्तकाः॥**[9]

ममालौकिकं रूपं यदा मायाविशिष्टं भवति तदा अव्याकृतं, अव्यक्तमिति कथ्यते। एतदव्यक्तं समस्तसृष्टितत्त्वानाम् कारणम्। एतस्मादव्यक्तादाकाशादिक्रमेण सर्वा सृष्टिर्जायते।

**एतद्धि यन्मया प्रोक्तं मम रूपमलौकिकम्**

**अव्याकृतं तदव्यक्तं मायाशबलमित्यपि॥**

**प्रोच्यते सर्वशास्त्रेषु सर्वकारणकारणम्।**

**तत्त्वानामादिभूतं च सच्चिदानन्दविग्रहम् ॥**[10]

या अव्यक्ता प्रकृतिर्विद्यते सा द्विविधा - माया, अविद्या च।

माया – एषा सत्त्वगुणात्मिका। एषा ब्रह्मण्याश्रिता भवति परन्तु ब्रह्माणं तिरोहितं न करोति तस्मादीश्वरो जानाति यद् अहं मायाश्रयो ब्रह्मास्मि। श्रीमद्भगवद्गीतायामपि कथितम् –

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**[11]

अविद्या – अविद्या त्रिगुणात्मिका भवति।एषापि चैतन्यमाश्रित्य भवति तथा च चैतन्यं तिरोहितं करोति तस्माद् जीवः न जानाति यदहं मायाश्रयो ब्रह्मास्मि।

---

[8] श्रीदेवीगीता ०२/०२-०४

[9] तत्रैव ०२/०८-१०

[10] तत्रैव ०२/ २४-२५

[11] ०७ / १४ श्रीमद्भगवद्गीता

IJARSCT

International Journal of Advanced Research in Science, Communication and Technology

International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal

ISSN: 2581-9429

Volume 5, Issue 5, December 2025

Impact Factor: 7.67

ईश्वरः- मायाविशिष्टं ब्रह्म ईश्वर इति कथ्यते। स ईश्वरः सर्वं जानाति,सर्वं करोति, स ईश्वर सर्वेषामुपर्यनुग्रहं करोति। अध्यासवशात् ईश्वरस्य स्थूलसूक्ष्मकारणशरीराणि भवन्ति। देहेन सह अध्यासात् त्रीणि नामानि भवन्ति ।कारणदेहिनः ईश्वरस्य ईश इति, सूक्ष्मदेहिन ईश्वरस्य सूत्रात्मा इति, स्थूलदेहिन ईश्वरस्य विराडिति ।

जीवः–अविद्याविशिष्टं चैतन्यं जीव इति कथ्यते। जीवोऽल्पज्ञः। जीवःसर्वदुःखानामाश्रयो भवति। अध्यासाद् जीवस्यापि देहत्रयं भवति – कारणदेहं, सूक्ष्मदेहं, स्थूलदेहञ्च। भिन्नशरीरे जीवो भिन्ननाम्ना भवति। कारणशरीरम् प्राप्तो जीवःप्राज्ञ इति, सूक्ष्मशरीरं प्राप्तो जीवः तैजस् इति, स्थूलशरीरं प्राप्तो जीवो विश्व इति कथ्यते -

**तत्र या प्रकृतिःप्रोक्ता सा राजन्द्विविधा स्मृता।**
**सत्त्वात्मिका तु माया स्यादविद्या गुणगुणमिश्रिता।**
**स्वाश्रयं या तु संरक्षेत् सा मायेति निगद्यते॥**
**तस्यां यत्प्रतिबिम्बं स्याद् बिम्बभूतस्य चेशितुः।**
**स ईश्वरःसमाख्यातः स्वाश्रयज्ञानवान्परः॥**
**सर्वज्ञः सर्वकर्ता च सर्वानुग्रहकारकः।**
**अविद्यायां तु यत् किंचित्प्रतिबिम्बं नगाधिप॥**[12]
**तदेव जीवसंज्ञं स्यात्सर्वदुःखाश्रयं पुनः।**
**द्वयोरपीह संप्रोक्तं देहत्रयमविद्यया॥**
**देहत्रयाभिमानाच्चाप्यभून्नामत्रयं पुनः।**
**प्राज्ञस्तु कारणात्मा स्यात् सूक्ष्मदेही तु तैजसः॥**
**स्थूलदेही तु विश्वाख्यस्त्रिविधः परिकीर्तितः।**
**एवमीशोपि संप्रोक्त ईशसूत्रविराट्पदैः॥**[13]

देवी वदति या माया पूर्वमुक्ता सा परमार्थदृष्ट्या नास्ति केवलं एकमेवाहस्मि। जगति यत्किंचिदस्ति तद् सर्वमहमेव। एतदेवोपनिषद्यपि कथितम् -**"सर्वं खल्विदं ब्रह्म"**[14]

**मन्मायाशक्तिसंक्लृप्तं जगत्सर्वं चराचरम्।**
**सापि मत्तः पृथङ्माया नास्त्येव परमार्थतः॥**[15]

अधुना देवी ज्ञानमार्गं विशेषरूपेण प्रतिपादयति। देवी कथयति राजन्! चैतन्यं देहाद्युपाधिसंयोगात् कर्त्ता,भोक्ता भवति देहं प्राप्य जीवो विविधं कर्म करोति। तेन कर्मणा पुण्यं पापं च भवति। पुण्यं पापं च भोक्तुं नानायोनीः प्राप्नुवन्ति योनिम् प्राप्य पुनःसुखदुःखे अनुभवन्ति। एवं पुनरपि जननं पुनरपि मरणं भवति।

अस्य संसारस्य मूलकारणं अज्ञानमेवास्ति। रामचरितमानसेऽपि जन्ममरणकर्मणां सर्वेषां कारणं मोहोऽर्थादज्ञानमेव कथितम् –

**जनमु मरनु जँह लगि जग जालू। संपति बिपति करम अरु कालू॥**

---

[12] श्रीदेवीगीता ०२/४२-४५

[13] तत्रैव ०२/४६-४८

[14] छां.उ. ०३/१४/०१

[15] श्रीदेवीगीता ०३/०१

**देखिअ सुनिअ गुनिअ मन माहीं।मोह मूल परमारथ नाहीं॥**[16]

अज्ञानेन कामना भवति कामनया कर्म भवति। अतो मुमुक्षुः सततमज्ञाननिवृत्यर्थं प्रयत्नं कुर्यात् । अज्ञाननाशनेनैव जीवनं सफलं भवति –

**क्रिया:करोति विविधा धर्माधर्मैकहेतव: ।**

**नानायोनीस्ततःप्राप्य सुखदुःखैश्च युज्यते॥**[17]

**घटीयंत्रवदेतस्य न विराम: कदापि हि ।**

**अज्ञानमेव मूलं स्यात् ततःकामःक्रियास्ततः॥**

**तस्मादज्ञाननाशाय यतेत नियतं नरः।**

**एतद्धि जन्मसाफल्यं यदज्ञानस्य नाशनम्॥**[18] ४/७

किं अज्ञानस्य नाशः कर्मणा न भवति उपासनया वा ? अस्य प्रश्नस्य उत्तरे देवी कथयति – कर्मणा अज्ञानस्य नाशो न भवति नोपासनया यतो हि अज्ञानेन सह अनयोर्विरोधो नास्ति तस्माद् सदा ज्ञानप्राप्त्यर्थं प्रयतेत। किं तर्हि कर्म न कुर्यात्? देवी कथयति एवं नास्ति यत् कर्म न कुर्यात् । शास्त्रविहितं वर्णाश्रमानुसारि कर्म तु कर्त्तव्यमेव परमेतद् ध्यातव्यं मुक्तिस्तु ज्ञानादेव भवति न कर्मणः।

**न कर्म तज्जं नोपास्तिर्विरोधाभावतो गिरे ।**

**प्रत्युताशाज्ञाननाशे कर्मणा नैव भाव्यताम्॥**[19]

**तस्मात्सर्वप्रयत्नेन ज्ञानं संपादयेन्नरः।**

**कुर्वन्नेवेह कर्माणीत्यतः कर्माण्यवश्यकम्॥**

**ज्ञानादेव हि कैवल्यमतः स्यात्तत्समुच्चयः।**

**सहायतां व्रजेत्कर्म ज्ञानस्य हितकारि च॥**[20]

ज्ञानं कथं प्राप्नुयादिति वर्णयति – निष्कामकर्मानुष्ठानेन चित्तस्य मलिनतामपवार्य, विवेकवैराग्यादिसाधनचतुष्टययुक्त: भूत्वा श्रद्धयान्वितो भक्तिपूर्वकं श्रोत्रियं ब्रह्मनिष्ठं गुरुं व्रजेत् ।गुरो:प्रमादरहितं वेदान्तं श्रुत्वा 'तत्त्वमसि' इत्यादिमहावाक्यानामर्थपूर्वकं विचारं कुर्यात्। महावाक्येनैव जीवब्रह्मणोरैक्यस्य प्रामाणिकं बोधो भवति तस्माद् अर्थपूर्वकं महावाक्यं जानीयात् ।

वाक्यार्थबोधे पदार्थावबोध: कारणं भवति तस्माद् सर्वप्रथमं महावाक्यस्य पदानां पृथक् -पृथगर्थं जानीयाद्

'तत्त्वमसि' अस्मिन् महावाक्ये त्रीणि पदानि सन्ति ,तदिति प्रथमं , त्वमिति द्वितीयम् , असि इति तृतीयं पदम् । तेषु तत्पदस्य वाच्यार्थोऽहं चिन्मात्रं,भगवती देवी परमेश्वरी अस्मि । त्वम्पदस्य वाच्यार्थो जीव:, असि इति पदेन द्वयोरेकता प्रतिपाद्यते परन्तु तत्त्वम्पदयो सर्वज्ञाल्पज्ञादिविरोधेन एकताग्रहणं सम्भवं नास्ति इति कृत्वा वाच्यार्थं त्यक्त्वा लक्ष्यार्थो गृह्यते। तत्त्वमिति द्वयोः पदयोर्लक्ष्यार्थं शुद्धचिन्मात्रमस्ति। चिद्रूपेण द्वावेकमेव इति तयोरैक्यं ज्ञात्वा सोऽपि तदेव ब्रह्म भवति –

**शमो दमस्तितिक्षा च वैराग्यं सत्त्वसम्भवः।**

---

[16] श्रीरामचरितमानसम् अयोध्याकाण्डं ०३/९१

[17] श्रीदेवीगीता ०४/०४

[18] तत्रैव ०४/०६,०७

[19] तत्रैव ०४/०९

[20] तत्रैव ०४/११-१२


DOI: 10.48175/IJARSCT-30629

**तावत्पर्यन्तमेव स्युः कर्माणि न ततः परम्॥**

**तदन्ते चैव संन्यस्य संश्रयेद्गुरुमात्मवान्।**

**श्रोत्रियं ब्रह्मनिष्ठं च भक्त्या निर्व्याजया पुनः॥**

**वेदान्तश्रवणं कुर्यान्नित्यमेवमतन्द्रितः।**

**तत्त्वमस्यादिवाक्यस्य नित्यमर्थं विचारयेत्॥**

**तत्त्वमस्यादिवाक्यं तु जीवब्रह्मैक्यबोधकम् ॥**

**ऐक्ये ज्ञाते निर्भयस्तु मद्रूपो हि प्रजायते॥**

**पदार्थावगतिःपूर्वं वाक्यार्थावगतिस्ततः।**

**तत्पदस्य च वाक्यार्थो गिरेऽहं परिकीर्तितः॥**

**त्वम्पदस्य च वाच्यार्थो जीव एव न संशयः।**

**उभयोरैक्यमसिना पदेन प्रोच्यते बुधैः॥**

**वाच्यार्थयोर्विरुद्धत्वादैक्यं नैव घटेत ह।**

**लक्षणाऽतःप्रकर्त्तव्या तत्त्वयोःश्रुतिसंस्थयोः॥**

**चिन्मात्रं तु तयोर्लक्ष्यं तयोरैक्यस्य सम्भवः।**

**तयोरैक्यं तथा ज्ञात्वा स्वाभेदेनाद्वयो भवेत् ॥**[21]

देवी पुनर्वदति स्थूलसूक्ष्मकारणोपाधीनां ज्ञानेन नाशे सति "अहमात्मा" इति बोध एव शेषो भवति। देहत्रयस्य अन्तरे पञ्चकोशा भवन्ति। पञ्चकोशस्य "नेति-नेति" इत्यादिश्रुत्या निषेधे सति ब्रह्मानुभूतिर्भवति तदेव मम वास्तविकं रूपम्।

**उपाधिविलये जाते केवलात्माऽवशिष्यते।**

**देहत्रये पञ्चकोशा अन्तस्थाः सन्ति सर्वदा॥**

**पञ्चकोशपरित्यागे ब्रह्मपुच्छं हि लभ्यते।**

**नेतिनेतीत्यादिवाक्यैर्मम रूपं यदुच्यते॥**[22]

वास्तविकं स्वरूपं वर्णयति – "अयमात्माऽऽनाद्यन्तोऽस्ति। अस्य न कदाचिज्जन्मो भवति न मृत्युः। यःकश्चिद् चिन्तयत्यहमात्मानं हन्तुं शक्नोमि अथवा यःकश्चिच्चिन्तयत्यहं हत उभौ तौ मूढौ" इत्थं श्रुतिवचनेन स्वस्य च युक्त्या निश्चित्य ममाऽऽत्मरूपं निदिध्यासेत् -

**न जायते म्रियते तत्कदाचिन्नायं भूत्वा न बभूव कश्चित्।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥**

**हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।**

**उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥**[23]

[21] तत्रैव ०४/१६-२३

[22] तत्रैव ०४/३०,३१

**इत्थं श्रुत्या च मत्या च निश्चित्यात्मानमात्मना।**

**भावयेन्मामात्मरूपं निदिध्यासनतोऽपि च ॥[24]**

अधुना देवी ध्यानविधिं वर्णयति– ध्यानसिद्ध्यर्थं सर्वप्रथमं देवीप्रणवस्य मंत्रस्य मन्त्रार्थस्य च प्रयोगं कृत्वा तस्य त्रयाणामक्षराणां स्वस्मिन् व्यष्टिदेहे एवं भावनां कुर्यात्– हकारःस्थूलशरीरं, रेफःसूक्ष्मशरीरम्, ईकारःकारणशरीरम्, अक्षरत्रयस्य समुच्चयो ह्रींकारस्तुरीय आत्माऽस्ति।एतादृशमेवेश्वरस्य समष्टिदेहे भावनां कुर्यात् पश्चात् समष्टिव्यष्ट्योरैक्यस्य भावनां कुर्यात्।

समाधे:प्रारम्भे एवं भावयित्वा पश्चाद् नेत्रे सम्मील्य मां जगदीश्वरीं देवीं ध्यायन् विगतकल्मषो भूत्वा एकान्ते प्राणापानौ नियम्य विश्वमात्मानं हकारं रेफे विलापयेत्, तैजसं रेफमीकारे विलापयेद्, ईकारं प्राज्ञात्मानं ह्रींकारे विलापयेत्। ह्रींकारे नादमये शिखरे शब्दार्थादिद्वैतरहितमखण्डं सच्चिदानन्दं ध्यायेत्।

**योगवृत्तेः पुरा स्वस्मिन्भावयेदक्षरत्रयम्।**

**देवीप्रणवसंज्ञस्य ध्यानार्थं मन्त्रवाच्ययोः॥**

**हकारः स्थूलदेहः स्याद्रकारः सूक्ष्मदेहकः।**

**ईकार:कारणात्मासौ ह्रींकारोऽहं तुरीयकम्॥**

**एवं समष्टिदेहेऽपि ज्ञात्वा बीजत्रयं क्रमात्।**

**समष्टिव्यष्ट्योरेकत्वं भावयेन्मतिमान्नर:॥**

**समाधिकालात्पूर्वं तु भावयित्वैवमादृत:।**

**ततो ध्यायन्निलीनाक्षो देवीं मां जगदीश्वरीम्॥**

**प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ।**

**निवृत्तविषयाकांक्षो वीतदोषो विमत्सरः॥**

**भक्त्या निर्व्याजया युक्तो गुहायां निःस्वने स्थले।**

**हकारं विश्वमात्मानं रकारे प्रविलापयेत्॥**

**रकारं तैजसं देवमीकारे प्रविलापयेत्।**

**ईकारं प्राज्ञमात्मानं ह्रीकारे प्रविलापयेत्॥**

**वाच्यवाचकताहीनं द्वैतभावविवर्जितम्।**

**अखण्डं सच्चिदानन्दं भावयेत्तच्छिखान्तरे ॥[25]**

देवी वदति राजन्! एवं ध्यानाभ्यासे सिद्धे मम साक्षात्कारो भवति मां साक्षात्कृत्य साधको मद्रूप एव भवति।

**ब्रह्म वेद ब्रह्मैव भवति।[26]**

इत्थं योगाभ्यासेन मां साक्षात्कृत्य साधक: कार्यसहितमज्ञानं नाशयति -

---

[23] तत्रैव ०४/३२-३३

[24] तत्रैव ०४/४०

[25] तत्रैव ०४/४१-४८

[26] मुण्डकोपनिषद् ०३/०२/०९

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 5, December 2025
Impact Factor: 7.67

**इति ध्यानेन मां राजन्साक्षात्कृत्य नरोत्तमः ।**

**मद्रूप एव भवति द्वयोरप्येकता यतः॥**

**योगयुक्त्याऽनया दृष्ट्वा मामात्मानं परात्परम् ।**

**अज्ञानस्य सकार्यस्य तत्क्षणे नाशको भवेत् ॥**[27]४/४९-५०

**निष्कर्षः -** देवी एव पर ब्रह्मस्वरूपिणी । परब्रह्मभगवत्योर्नास्ति भेदः। उपनिषदादौ यं ब्रह्मततत्त्वं नित्यं, शुद्धं, बुद्धम् मुक्तं, परिपूर्णं, निर्गुणं, निर्विकारं, शुद्धचैतन्यं प्राहुर्मनीषिणस्तदेव देव्या निजस्वरूपम्। सैव देवी चैतन्यारूपा । देव्याः स्वरूपज्ञानेन भ्रमनिवृत्तिरविद्यानि वृत्तिर्द्वैतनिवृत्तिर्भूत्वा जीवब्रह्मणोरैक्यं भवति। तत्त्वमसि महावाक्ये कथित: तत्पदार्थ:सैव चिद्रूपिणी । दृश्यमानजगति बुद्धिः,धृतिः,स्मृतिः,श्रद्धा,मेधा,दया,लज्जा,क्षमा,कीर्तिः, शान्तीत्यादयः देव्या एव रूपाणि सन्ति । इयं देवीगीता जगन्मातरं साक्षात्कर्तुं प्रमुखं साधनं । जगन्माता अस्मान् सन्मार्गे प्रेरयेत् ।

**सन्दर्भग्रन्थ सूची**

**१.** श्रीमद्देवीभागवतपुराणम्, खेमका राधेश्याम, प्रकाशकः गोरखपुर, गीताप्रेस, प्रकाशनवर्षं संवत् २०६७ ।

**२.** श्रीमद्देवीगीता, गिरि ईश्वरानन्द, प्रकाशकः सन्त सरोवर आबूपर्वत, संवित्साधनायन, प्रकाशनवर्षं संवत् २०६२

**३.** देवीगीता एवं इष्टसाधना, शास्त्री अमरनाथ, प्रकाशकः – पटियाला अमरशक्ति प्रकाशन , वर्षं १९७०।

**४.** एकादशोपनिषद् सिद्धान्तालङ्कार: सत्यव्रतः प्रकाशकः, नईदिल्ली विजयकृष्ण लखनपाल

**५.** वेदान्तसार: सदानन्द: यतिः / शास्त्री राकेश: प्रकाशकः दिल्ली, परिमल पब्लिकेशन्स प्रकाशनवर्षं २००४

**६.** श्रीमद्भगवद्गीता महर्षिवेदव्यासः, स्वामी रामदेवः, प्रकाशकः, हरिद्वारम्, दिव्यप्रकाशनम् प्रकाशनवर्षं संवत् २०७५

**७.** श्रीरामचरितमानस गोस्वामी तुलसीदासः/ पोद्दार हनुमान् प्रसाद: प्रकाशकः, गोरखपुरं गीताप्रेस

---

[27] श्रीदेवीगीता ०४/४९-५०